**QP CODE** **Enrollment Number: ………………**

**T5031** **Name: ……………………………….**

# MA DEGREE EXAMINATIONS, MAY 2024

**First Semester**

**M.A. Sanskrit Language and Literature**

**M23SN02DC – महाकाव्यम्**

**(2023 July admissions)**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संसकृतलेखने देवनागरीलिपि उपयोक्तव्या।**

(Answers should be written in Sanskrit using Devanagari script)

**Time: 3 Hours** **Max Marks: 70**

## Section A

**एकखण्डिकया केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।**

1. कालिदासात् पूर्वकालीनस्य महाकाव्यस्य किं वैशिष्ट्यम्?
2. यादवाभ्युदयमिति काव्यमधिकृत्य वाक्यद्वयं लिखत।
3. अनुस्मृताखण्डलसूनुविक्रमः इति पदस्य विग्रहं लिखत।
4. स्थलीम् अधिशय्य – अत्र व्याकरणकार्यं लिखत।
5. श्रीहर्षस्य कृतीनां नामानि लिखत।
6. भीमभूपतेः नामसार्थकतां प्रदर्शयत।
7. माघे सन्ति त्रयो गुणाः – ते गुणाः के? श्लोकं सम्पूर्णं लिखत।
8. प्रदीपः स्नेहमादत्ते दशया अभ्यन्तरस्थया - स्पष्टयत। **(2X5=10)**

## Section B

**एकपुटेन केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत।**

9. बुद्धचरितस्य कथासन्दर्भं सङ्गृह्य लिखत।
10. भारवेः जीवनकालमधिकृत्य लिखत।
11. सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः।। - सप्रसङ्गं व्याख्यात।

12. मनोरमामात्मवधूमिव श्रियम् – अत्र अलङ्कारनिर्णयः कार्यः।

13. अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः।। - सप्रसङ्गम् आशयं विशदयत।

14. कृतमातपसंज्वरं तरोरभिवृष्यामृतमंशुवानिव – आशयं विशदयत।

15. पतगश्चिरकाललालनादतिविश्रम्भमवापितो नु सः।
अतुलं विदधे कुतूहलं भुजमेतस्य भजन्महीभुजः।। श्लोकमिमं व्याख्यात।

16. माघे मेघे गतं वयः – उक्तिमिमां स्पष्टयत।

17. अनुज्झितार्थसंबन्धः प्रबन्धो दुरुदाहरः – सप्रसङ्गं व्याख्यात।

18. उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः।
हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान्।। श्लोकं व्याख्यात। **(5X6=30)**

## Section C

**केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत।**

19. वनेचरोक्तदिशा दुर्योधनशासनप्रकारं विशदयत।

20. भारवेः अर्थगौरवमधिकृत्य निबन्धो लेख्यः।

21. नैषधं विद्वदौषधम् इत्युक्तिं समर्थयत।

22. अधीतग्रन्थांशानुसारं शिशुपालवधस्य द्वितीयसर्गकथासारं सङ्गृह्णीत। **(15X2=30)**